च्छेदगमे तु ताभ्यस्तदन्यवर्णोन्मितयः प्रसाध्याः । अन्योन्मितौ कुट्टविधेर्गुणाप्ती ते भाज्यतद्भाजकवर्णमाने ॥ अन्येऽपि भाज्ये यदि सन्ति वर्णास्तन्मानमिष्टं परिकल्प्य साध्यम् । विलोमकोत्थापनतोऽन्यवर्णमानानि भिन्नं यदि मानमेवम् ॥ भूयः कार्य्यः कुट्टकोऽत्रान्त्यवर्णं तेनोत्थाप्योत्थापयेद्व्यस्तमानात्" । "इदमनेकवर्णसमीकरणं बीजं यत्रोदाहरणे द्वित्र्यादयोऽव्यक्तराशयो भवन्ति तेषां यावत्तावदादयो वर्णाः मानेषु कल्प्यास्तत्र पूर्व्वाचार्य्यैः कल्पिताः यावत्तावत्, कालक, नीलक, पीतक, लोहितक, श्वेतक, चित्रक, कपिलक, पिङ्गलक, धूम्रक, पाटलक, शवलक, श्यामलक, मेचका, इत्यादि । अथ वा कादीन्यक्षराणि अव्यक्तानां संज्ञाः असङ्कराथं कल्प्याः । अतः प्राग्वदुद्देशकालापवद्विधिं कुर्वता गणकेन पक्षौ समौ कार्य्यौ पक्षा वा समाः कार्य्याः। ततः सूत्रावतारोऽयं तयोः समयोरनेकत्वात् पक्षादितरपक्षस्याद्यं वर्णं शोधयेत्तदन्यवर्णान् रूपाणि च इतरपक्षाच्छोधयेत्ततः आद्यवर्णशेषेणेतरपक्षे भक्ते भाजकवर्णोन्मितिः । बहुषु पक्षेषु ययोर्ययोः साम्यमस्ति तयोरेवं कृते सति अन्या उन्मितयः स्युः। ततस्तास्तून्मितिषु एकवर्णोन्मितयो यद्यनेकधा भवन्ति ततस्तासां मध्ये द्वयोर्द्वयोः समीकृतच्छेदगमेनाद्यं वर्णं शोधयेदित्यादिनान्यवर्णोन्मितयः स्युः । एवं यावत्सम्भवस्ततोऽन्योन्मितौ भाज्यवर्णे योऽङ्कः स भाज्यराशिः, यो भाजके स भाजकः, रूपाणि क्षेपः, अतः कुट्टकविधिना यो गुण उत्पद्यते तद्भाज्यवर्णमानं, या लब्धिस्तद्भाजकवर्णमानं, तयोर्मानयोर्दृढभाजकभाज्याविष्टेन वर्णेन गुणितौ क्षेपकौ कल्प्यौ । ततः स्वस्वमानेन सक्षेपेण पूर्व्ववर्णोन्मितौ वर्णावुत्थाप्य स्वच्छेदेन हरणे यल्लभ्यते तत् पूर्व्ववर्णस्य मानम् । एवं विलोमकोत्थापनतोऽन्यवर्णमानानि भवन्ति । यदि तु अन्योन्मितौ द्व्यादयो वर्णा भवन्ति तदा तेषामिष्टानि मानानि कृत्वा स्वस्वमानैस्तानुत्थाप्य रूपेषु प्रक्षिप्य कुट्टकः कार्य्यः।अथ यदि विलोमकोत्थापने क्रियमाणे पूर्व्ववर्णोन्मितौ तन्मितिर्भिन्ना लभ्यते तदा कुट्टकविधिना यो गुण उत्पद्यते स क्षेपः स भाज्यवर्णमानं तेनान्यवर्णमानेषु तं वर्णमुत्थाप्य पूर्व्वोन्मितिषु विलोमकोत्थापनप्रकारेणान्यवर्णमानानि साध्यानि । इह यस्य वर्णस्य यन्मानमागतं व्यक्तमव्यक्तं, व्यक्ताव्यक्तं वा तस्य मानस्य व्यक्ताङ्केन गुणने कृते तद्वर्णाक्षरस्य निरसनमुत्थापनमुच्यते" तद्व्याख्या । उदाहरणं तत्रैव दृश्यम् ।

**अनेकविध** त्रि॰ अनेका विधा प्रकारा यत्र । बहुप्रकारे "यत्रानेकविधमान्तर्य्यं तत्र स्थानत आन्तर्य्यं बलीय" इति परि॰ ।

**अनेकशस्** अव्य॰ अनेक+वीप्सार्थे कारके शस् । अनेकवारार्थे "अनेकशो निर्ज्जितराजकस्त्वमिति" भट्टिः ।

**अनेकाग्र** त्रि॰ न एकाग्रः । शून्यहृदये एकाग्रताशून्ये

**अनेकान्त** त्रि॰ न एकान्तो नियमो अव्यभिचारो यत्र । अनियमे, अनिश्चितफलके च । व्यभिचारवति दुष्टहेतौ पु॰ । "अनेकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधेति" भाषा॰ । स च त्रिविधः "आद्यः साधारणस्तु स्यादन्योऽसाधारणो मतः । तथैवानुपसंहारी त्रिधाऽनैकान्तिको मत" इति भाषा॰। एकान्तोऽस्त्यस्य प्रज्ञा॰ण । ऐकान्तः न॰त॰ अनैकान्तोऽप्यत्र क्वचित् "भाषायाम् अनैकान्तो विरुद्ध स्तथैव" पाठः । तथा च साधारणादित्रितयान्यान्यत्वमनेकान्तत्वम् ।

**अनेकान्तवादिन्** पु॰ अस्ति नास्ति वेत्येकान्तं न वदति वद–णिनि ६त॰ । बौद्धभेदे । तस्य अस्तिनास्तिकायवादित्वेन तथात्वं विवरणमर्हच्छब्दे दृश्यम् ।

**अनेकार्थ** त्रि॰ अनेके अर्था अभिधेया यस्य । नानार्थे शब्दे । यथा गवादय अक्षादयश्च । 'अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते । एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रयेति" सा॰द॰। अयमाशयः "संयोगश्च विभागश्च साहचर्य्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालाद्युक्तिः स्ववाचकः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव" इति हर्य्युक्तेरनेकार्थशब्दानां सर्वत्र शक्तौ समानायां सत्यां, संयोगाद्यैरितरार्थबोधप्रतिरोधनेन विशेषार्थ एव स्मार्य्यते । तद्भिन्नार्थस्य तु व्यञ्जनया बोधः इत्यलङ्कारिकाणां मतम् । तथाच संयोगादयः शक्त्या अन्यार्थोपस्थितौ प्रतिबन्धकाः । व्यञ्जना वृत्त्या तदुपस्थापने तु न । 'अनेकार्थशब्देभ्यःसर्वेषामर्थानामविशेषेणोपस्थितौ सत्यामपि संयोगादयः अन्यशक्यविषयशाब्दबोधमात्रं प्रतिवध्नन्ति नतु व्यङ्ग्यविषयमिति" रसगङ्गाधरः। नैयायिकादयस्तु अनेकार्थशब्दानां शक्यतावच्छेदकलाघवलाभे तत्रैव शक्तिरन्यत्र लक्षणा तत्र संयोगादयः अन्यार्थबोधनं नैव प्रतिबध्नन्ति । तथा च संयोगादयः सति तात्पर्य्ये, तद्विषयीभूतार्थविषयस्मृतिं तज्जन्यान्वयबुद्धिं वा न प्रतिवध्नन्ति किन्तु तात्पर्य्यमात्रोन्नायका इत्यलं व्यञ्जनावृत्तेरपि स्वीचक्रुरिति भेदः । अनेके अर्थाः प्रयोजनानि